# Jyotirlingadishivakshetravarnanam

# જ્યોતિર્લિઙ્ગાદિશિવક્ષેત્રવર્ણનમ્

## Document Information

Text title : Jyotirlingadishivakshetravarnanam

File name : jyotirlingAdishivakShetravarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 20 - kShetravarNanam | 16-51||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# જ્યોતિર્લિઙ્ગાદિશિવક્ષેત્રવર્ણનમ્

(ઈશ્વરદેવી સંવાદે)
સન્તુષ્ટા ભવ શૈલનન્દિનિ શિવે નાતઃ પરં વિદ્યતે
મલ્લિઙ્ગાર્ચનમેવસાધનપરં મુક્તિપ્રદં શાશ્વતમ્ ।
કિં યજ્ઞૈરખિલવ્રતાદિચરણૈઃ કિં દાનસઙ્ઘૈર્જપૈ-
રેતત્કિં વિતનોતિ મુક્તિરિતિ યા સાધીર્હિ દુઃખાત્મનામ્ ॥ ૧૬॥

ઉદ્યદ્બાલદિવાકરેન્દુસદૃશૈઃ કૈલાસશૃઙ્ગાગ્રગૈઃ
માણિક્યામલહીરકૈશ્ચ કલિતૈસ્સૌધાગ્રશૃઙ્ગૈશ્શિવે ।
તત્તલ્લોકનિવાસિભિસ્સુરગણૈસ્સઞ્જાતવિસ્માપકૈઃ
નાનાસૂર્યશશાઙ્કસમ્ભવમહાકાન્ત્યાધિકં શોભતે ॥ ૧૭॥

કૈલાસાચલમાનુપાદશિખરે સત્યાધિકે મેરુગા
લોકાલોકિન એવ તત્ર વિહિતા દિક્પાલઙ્ઘાશ્શિવે ।
બ્રહ્માવિષ્ણુમહેશ્વરામરવરાસ્સપ્તર્ષયોઽમીગ્રહાઃ
શ્ચૌત્તાનાત્મજ એષ ભાન્તિ નિતરાં તારાગણા રાશયઃ ॥ ૧૮॥

તે મેરું પરિતો ભ્રમન્તિ ગિરિજે પશ્યાધુના સન્તતં
તત્તદ્ગોપુરમધ્યભાગવિલસત્તૌર્યત્રિકાણાં સ્વનૈઃ ।
તત્તત્કાલશિવાર્ચનેષુ કલિતૈર્ભેરીજશઙ્ખારવૈઃ
કૈલાસોઽપ્યયમીશ્વરેશ્વરિ મહાસન્નાદનાદાન્તરઃ ॥ ૧૯॥

મેઘાનાં શતકૈરપિ પ્રમુદિતો ઘોષૈકમૂષામુખઃ ॥

વસુધાધરકન્દરાન્તરસ્થારદખણ્ડદ્વિરદાઃ કિશોરસિંહ્માઃ ।
સ્વકકાધરકેસરૈર્નગેન્દ્રૈઃ પરિનિન્દતિ વિદીપ્તમિત્યુમેઽદ્ય ॥ ૨૦॥

રવિરથ તુરગોત્થહ્રેષઘોષં પરિશૃણ્વન્તિ ઇમે હયારિસઙ્ઘાઃ ।
વિનતાનનકર્ણશૃઙ્ગનેત્રાસ્તટિદુત્થાખિલસ્મરૈકરાવાઃ ॥ ૨૧॥

ખરખુરપરિઘટ્ટનોથધૂલ્યાજલદનિભં રવિમમ્બિકેઽદ્યપશ્ય ।

રવિરપિ સ્વતનૂજમુખ્યવાહૈર્ગિરિસંસ્થૈરભિજાતલજ્જયેવ ॥ ૨૨॥

પ્રસભં મેઘગણં વિશીર્ય હસ્તૈર્વિજિતોઽસ્મીતિ દિશં પ્રયાતિ યામીમ્ ।
મદાલયોઽયં કલધૌતશૈલસ્તદગ્રતો ભાતિ સુવર્ણશૈલઃ ॥ ૨૩॥

તદૂર્ધ્વમૌલિસ્થિતલોકજાલં વિલોકયાથો વિહિતન્નગસ્ય મે ॥ ૨૪॥

બ્રહ્માપ્યેષ સૃજત્યજસ્રમખિલં લોકં હરિઃ પાત્યયં
રુદ્રસ્સંહરતેઽનિશં સુરવરૈર્દિક્પાલસઙ્ઘૈશ્શિવે ।
સત્યસ્થોવિધિરેષ વિષ્ણુભવનં વૈકુણ્ઠમાલોકયા-
પીશાનસ્ય પુરીયમદ્રિવરજે ચેન્દ્રસ્ય ચૈષા પુરી ॥ ૨૫॥

એષા સંયમિની પુરી સુવિહિતા ક્ષીરોદધેઃ પારતો
ગઙ્ગૈષા સરિતાં વરા ત્રિજગતાં પાપાપહા મે પુરી ।
લિઙ્ગાલઙ્કૃતકોટિકાર્બુદનિભા વારાણસીજ્યા શિવે
વિશ્વેશાખ્યમહેશલિઙ્ગવરગં દેવ્યન્નપૂર્ણા ત્વયા ॥ ૨૬॥

સુરાસુરા યત્ર વસન્તિ મુક્તયે વસન્ત્યનિષ્ટં પરિહાય મત્સરમ્ ।
યતો ન મુક્તં હિ મયાવિમુક્તં વદન્તિ વેદા અપિ તત્પ્રભાવમ્ ॥ ૨૭॥

ગઙ્ગાદ્વારમિદં પિતુસ્તવ મહામૌલૌ ચ કેદારકં
ચૈષા સા વતપાટલીનગરગાયસ્યાસ્સુતા માનસાઃ ।
ગઙ્ગાસૂર્યતનૂજયોશ્ચ વિહિતસ્સઙ્ગોઽત્ર મુક્ત્યૈ નૃણાં
સ્નાતાનાંઞ્ચ સદા સરિત્પતિવરેણાલિઙ્ગિતા જાહ્નવી ॥ ૨૮॥

ગઙ્ગાસાગરસઙ્ગમોઽત્ર ગિરિજે સોમેશ્વરોઽયં સદા
સેવ્યાનાં સફલં કરોતિ ચ મનસ્સન્તાપપાપાપહમ્ ॥ ૨૯॥

એષપ્રયાગસ્સકલાપગાશ્રયો ગઙ્ગાપિ યત્રામ્બુજમિત્રજાયુતા ।
તત્રાપ્લુતાનાં દિવિ દેવિ વાસો વિસર્જિતાઙ્ગા યદિ તેષુ મુક્તિઃ ॥ ૩૦॥

સા બ્રહ્મણો વેદિરનન્તપુણ્યદા ગયા પિતૄણાં પ્રમુદે ભવાનિ ।
પશ્યાદ્ય તત્રૈવ પદં મદીયં સુરદ્વિજાનાન્તુ તથૈવ વૈષ્ણવમ્ ॥ ૩૧॥

તન્નૈમિષં પુણ્યતમં મહર્ષિભિસ્સમાકુલાં તાં બદરીં વિલોકય ।
સચિત્રકૂટસ્સુરસઙ્ઘસંવૃતસ્સપ્તૈવ પુર્યોઽત્ર વિમુક્તિહેતવઃ ॥ ૩૨॥

એતદ્દ્વાદશલિઙ્ગસઙ્ઘમગજે તત્તત્પુરીષુ સ્થિતં
ચોઙ્કારો ઘુસૃણેશ્વરોઽયમગજે શ્રીકામનાથોઽમ્બિકે

અસૌ મહાકાલવરો મહેશો નાગેશ્વરો વેણુવનૈકસંશ્રયઃ ॥ ૩૩॥

એષા શર્મદનર્મદાત્રકલિતા લિઙ્ગૈકસઙ્ઘાવૃતા
શોણોઽયં સરિતાં પતિં પ્રવહતે લિઙ્ગૈકસઙ્ઘનશ્રયઃ ।
પુણ્યા બાહુનદી સુપુષ્કરમિદં પુણ્યં પ્રભાસં ત્વિદં
મલ્લિઙ્ગામલપાતકં ગિરિવરાજ્જાતેઽમરં કણ્ટકમ્ ॥ ૩૪॥

શ્રીરુદ્રોઽમરકોટિરેષ વિહિતઃ પિણ્ડારકં મત્પ્રિય-
ઞ્ચૈતત્ક્ષેત્રવરં કુરુપ્રભવજં વિન્ધ્યો હ્યયં શૈલજે ।
એષ શ્રીશૈલમૌલિર્ભવજનિતમહાપાપસઙ્ઘૈકહન્તા-
ચૈષાત્ર્યમ્બકશૈલજા સુવિહિતા ગોદાવરી નિમ્નગા ॥ ૩૫॥

કૃષ્ણા ચાપિ સરિદ્વરાબ્ધિનિરતા લિઙ્ગાવૃતા પુણ્યદા ॥ ૩૬॥

તત્પ્રાન્તસંસ્થો ઘટજો મુનીશો મયા પુરા પ્રેષિત એવ વિન્ધ્યહૃત્ ।
પશ્ચાદથામ્ભોનિધિતીરસઙ્ગતં ગોકર્ણમેતન્મમ લિઙ્ગમમ્બિકે ॥ ૩૭॥

અરુન્ધદેષોઽમરમાર્ગમમ્બિકે પ્રજાતરોષઃ કનકાચલેન ।
વિન્ધ્યોઽપ્યયં શૈલવરસ્ત્વદાશ્રયાત્પુણ્યં પ્રતિષ્ઠાનપુરં સુપુણ્યદમ્ ॥ ૩૮॥

કોલાસુરેણાત્ર સમીહિતા પુરી તપસ્યતા તસ્ય વધાત્ત્વયા જિતા ।
એષોઽરુણાદ્રિઃ પ્રથિતપ્રભાવો વૃદ્ધાદ્રિરપ્યેવ મમેષ્ટવાસઃ ॥ ૩૯॥

ગોપર્વતશ્ચાત્ર વિભાતિ શૈલઃ કાઞ્ચી જગત્કાઞ્ચિતલિઙ્ગસંયુતા ।
ત્વદાશ્રયાત્કાન્તતમા ચ સૈવ ત્વદર્ચનાર્થં હરિણા ચ સેવિતા ॥ ૪૦॥

શેષાચલસ્ત્વેષ સુતાશ્રયો મમ તદુત્તરે ભાતિ મહેશિ પશ્ય ।
કૈલાસ એષોઽભિમતો હિ દક્ષિણસ્સહ્યાચલો હ્યેષ યતો મરુદ્વૃધા ॥ ૪૧॥

સહ્યાપગાતીરગલિઙ્ગમણ્ડલં મહાપ્રભાવં કિલ શૈલકન્યે ।
કવેરકન્યાતટલિઙ્ગસઙ્ઘં શ્રીકણ્ઠરત્નાદિકમાતૃભૂતમ્ ॥ ૪૨॥

તજ્જમ્બુલિઙ્ગઞ્ચ હરિસ્તતોઽપિ પઞ્ચાપગેશાખ્યમહો ભવાનિ ।
કુમ્ભેશ્વરં લિઙ્ગમિદં મનોજ્ઞં તદર્જુનઞ્ચાપિ મયૂરલિઙ્ગમ્ ॥ ૪૩॥

શ્વેતેશ્વરં તત્પ્રથિતં વિમુક્તિદં તદુત્તરે યદ્ગિરજં વિશોકમ્ ।
હૃત્પુણ્ડરીકં વિમલં મમાશ્રયં યત્રૈવ મે નર્તનમમ્બિકે ત્વયા ॥ ૪૪॥

સદૈવ દૃષ્ટં પ્રથિતે પ્રદોષે ક્ષારામ્બુધેસ્તીરગતં સુપુણ્યદમ્ ।
વેદાખ્યસત્કાનનમબ્જસઞ્જ્ઞં લિઙ્ગાવૃતં તત્કમલાલયાખ્યમ્ ॥ ૪૫॥

શ્રીસુન્દરં વિષ્ણુપુરઞ્ચ દેવિ તતોઽપિ તદ્દ્વીપગગન્ધમાદને ।
નગોત્તમે લિઙ્ગવરં મમામ્બિકે ॥ ૪૬॥

હરિઃ પુરા ભાર્ગવજેન શપ્તો ભાર્યાવિયુક્તોઽપ્યહનત્સરાવણમ્ ।
તેનૈવ તત્પૂજિતમમ્બિકેઽદ્ય પશ્યાધુના સેતુવરં સુપુણ્યમ્ ॥ ૪૭॥

તત્પશ્ચિમે પુણ્યતમં મમામ્બિકે હાલાસ્યસઞ્જ્ઞં વરવેણુસઞ્જ્ઞમ્ ।
તત્રૈવ તામ્રાચલસઙ્ગતોઽબ્ધિસ્તત્તીરસંસ્થાન્યપિ દેવિ પશ્ય ॥ ૪૮॥

લિઙ્ગાનિ તુઙ્ગાનિ મનોહરાણિ મહેન્દ્રશૈલો મલયશ્ચ શૈલઃ ।
એતાનિ તે ક્ષેત્રવરાણિ દેવિ દૃષ્ટાનિ ચ શ્રોત્રવરૈશ્શ્રુતાનિ ॥ ૪૯॥

પાપાદ્રિમૌલેર્ભિદુરાણિ પશ્ય ક્ષેત્રેક્ષણેનાપિ વિમુક્તપાપાઃ ॥ ૫૦॥

ક્ષેત્રાણાઞ્ચ પતિસ્સદૈવ કથિતો વેદેષુ પશ્યાદરા-
દારાત્સર્વજગદ્ગતોઽપિ વિદુષાં દુષ્ટાત્મનાં શૈલજે ।
કષ્ટાન્યપ્યસમીક્ષ્ય યોઽત્ર વિહિતઃ ક્ષેત્રેષુ વા સાદર-
સ્તસ્મૈ તાં વિતરામિ મુક્તિમગજે રુદ્રાક્ષભસ્માદરે ॥ ૫૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે જ્યોતિર્લિઙ્ગાદિશિવક્ષેત્રવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૨૦ - ક્ષેત્રવર્ણનમ્ । ૧૬-૫૧॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 20 - kShetravarNanam . 16-51..

Notes:
In addition to continuation about description about Mount Kailāsa કૈલાસ શૈલ, Śiva શિવ outlines to Devī દેવી about several Śivakṣetra શિવક્ષેત્ર - including the Jyotirliṅga જ્યોતિર્લિઙ્ગ. Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Jyotirlingadishivakshetravarnanam*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*